# Shantidharmakritam Agni Stotram

# शान्तिधर्मकृतं अग्निस्तोत्रम्

## Document Information

Text title : Shantidharmakritam Agni Stotram

File name : shAntidharmakRRitaMagnistotram.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 158/21-36||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


April 12, 2026

*sanskritdocuments.org*

# शान्तिधर्मकृतं अग्निस्तोत्रम्

कर्तव्योऽत्र मया सोऽयं धर्मोऽत्र प्रथमो मम ।
विचार्येत्थं स मतिमान् वह्निस्तोत्रं जगौ तदा ॥ २१॥

शरणं पावकं गत्वा त्वेकचित्तः स्तवं व्यधात् ।
"ॐ नमोऽनन्तशक्त्युग्रशक्त्यात्मने हरेः प्रभोः ॥ २२॥

ॐ नमः सर्वलोकानां मखसाधनमूर्तये ।
एकद्विपञ्चधिष्ण्याय राजसूये षडात्मने ॥ २३॥

प्रत्यक्षदेवरूपाय नमस्ते देववृत्तये ।
सर्ववर्ष्मवतां शुक्ररूपाय बलिने नमः ॥ २४॥

त्वं मुखं सर्वदेवानामीश्वराणां हरेरपि ।
त्वं पाकः सर्वभूतानामन्नानां रसिनां तथा ॥ २५॥

हुतं हविर्भक्षयँस्त्वं मेघत्वाय करोषि वै ।
वृष्टिरूपं तु तद्भूत्वौषधिव्रातान् प्रपुष्यति ॥ २६॥

तत्फलाद्यैर्भूतवासाः सुखं जीवन्ति जन्तवः ।
तत्समिद्धिर्जना यज्ञान् प्रकुर्वन्ति सुरा अपि ॥ २७॥

दैत्याश्च राक्षसाश्चापि त्वदाधारा विभावसो ।
जरायुजाश्चाण्डजाश्च स्वेदजा भूमिजा अपि ॥ २८॥

आप्यायन्ते त्वया सर्वे संवृध्यन्ते त्वयाऽनल ।
संरक्ष्यन्ते त्वया सर्वे तथा मां परिरक्षय ॥ २९॥

देवेषु तैजसत्त्वं वै कान्ति सिद्धेषु वै भवान् ।
विषं नागेषु चास्से त्वं वायुभागः पतत्रिषु ॥ ३०॥

मनुजेषु पशुपक्षिगणे क्रोधो भवानपि ।
अवष्टम्भश्च तरुषु काठिन्यं त्वं क्षितावपि ॥ ३१॥

जले द्रवो भवानेव जवो भवान् हि वायुषु ।
व्यापकस्त्वं नभस्येव सर्वम्भूतान्तरस्थितः ॥ ३२॥

त्वमेकस्त्रिविधश्चाप्यष्टधा सहस्रधापि च ।
स्वाहास्वधादिभिर्भोक्ता हव्यकव्यस्य वै भवान् ॥ ३३॥

हेतिष्वापि भवानेव धारासु संविराजते ।
जातवेदो नमस्तुभ्यं पिङ्गाक्ष ते नमोऽस्तु च ॥ ३४॥

हुताशन नमस्तेऽस्तु नमस्ते हव्यवाहन ।
पावकाऽद्य नमस्तेऽस्तु नमस्ते विश्वपावक ॥ ३५॥

पाककर्तर्नमस्तेऽस्तु पोष्टस्ते च नमो नमः ।
त्वं ज्योतिस्त्वं महादित्यो विभावसो नमोऽस्तु ते ॥ ३६॥

हिरण्यरेता वह्निस्त्वं सप्तजिह्व नमोऽस्तु ते ।

इति श्रीलक्ष्मीनारायणीयसंहितायाः द्वापरयुगसन्तानात्मकस्य तृतीयखण्डे १५८-अध्यायान्तर्गतं शान्तिधर्मकृतं अग्निस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ३। अध्याय १५८/२१-३६॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 158/21-36..

Proofread by PSA Easwaran

*Shantidharmakritam Agni Stotram*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*